विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम्। देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवाऽविदुषस्त्वहंधीः। विवेकविज्ञानवतोमहात्मनो ब्रह्माहमित्येव मतिः सदात्मनि। अत्रात्मबुद्धिं त्यज मूढबुद्धे! त्वङ्मांसमेदोस्थिपुरीषराशौ। सर्व्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शान्तिं परमां भजस्व। देहेन्द्रियादावसति भ्रमोदितां विद्वानहन्तां न जहाति यावत्। तावन्न तस्यास्ति विमुक्तिवार्त्ताप्यस्त्वेष वेदान्तनयान्तदर्शः। छायाशरीरे प्रतिविम्बगात्रे यत् स्वप्नदेहे हृदि कल्पिताङ्गे। यथात्मबुद्धिस्तव नास्ति काचित् जीवच्छरीरे च तथैव मास्तु। देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य वीजम्। यतस्ततस्त्वं जहि तां प्रयत्नात् त्यक्ते तु चित्ते न पुनर्भवाशा। कर्म्मेन्द्रियैः पञ्चभिरन्वितोऽयं प्राणो भवेत् प्राणमयस्तु कोषः। येनात्मवानन्नमयोऽन्नपूर्णात् प्रवर्त्ततेऽसौ सकलक्रियासु। नैवात्मापि प्राणमयो वायुविकारो गन्ता गन्ता वायुवदन्तर्ब्बहिरेषः। यस्मात् किञ्चित् क्वापि न वेत्तीष्टमनिष्टं स्वं वान्यं वा किञ्चन नित्यं परतन्त्रः। ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात् कोषोममाहमिति वस्तुविकल्पहेतुः। संज्ञादिभेदकलनाकलितो बलीयांस्तत्पूर्ब्बकोषमभिपूर्य्य विजृम्भते यः। पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः प्रचीयमानोविषयाज्यधारया। जाज्वल्यमानो बहुवासनेन्धनैर्मनोमयाग्निर्दहति प्रपञ्चम्। न ह्यस्त्यविद्या मनसोऽतिरिक्ता मनोह्यविद्या भवबन्धहेतुः। तस्मिन् विनष्टे सकलं विनष्टं विजृम्भितेऽस्मिन् सकलं विजृम्भते। स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या भोक्त्रादि विश्वं मनएव सर्व्वम्। तथैव जाग्रत्यपि नो विशेषस्तत्सर्व्वमेतन्मनसो विजृम्भणम्। सुषुप्तिकाले मनसि प्रलीने नैवास्ति किञ्चित् सकलप्रसिद्धेः। अतो मनःकल्पितएव पुंसः संसार एतस्य न वस्तुतोऽस्ति। वायुना चीयते मेघः पुनस्तेनैव लीयते। मनसा कल्प्यते बन्धोमोक्षस्तेनैव कल्प्यते। देहादिसर्व्वविषये परिकल्प्य रागं बध्नाति तेन पुरुषं पशुवद्गुणेन। वैरस्यमत्र विषवत् सुविधाय पश्चादेनं विमोचयति तन्मन एव बन्धात्। तस्मान्मन. कारणमस्य जन्तोर्बन्धस्य मोक्षस्य च वा विधाने। बन्धस्य हेतुर्मलिनं रजोगुणैर्मोक्षस्य शुद्धं विरजस्तमस्कम्। विवेकवैराग्यगुणातिरेकाच्छुद्धत्वमासाद्य मनोविमुक्त्यै। भवत्यतोबुद्धिमतो मुमुक्षोस्ताभ्यां दृढाभ्यां भवितव्यमग्रे। मनो नाम महाव्याघ्रो विषयारण्यभूमिषु। चरत्यत्र न गच्छन्तु साधवो ये मुमुक्षवः। मनः प्रसूते विषयानशेषान् स्थूलात्मना सूक्ष्मतया च भोक्तुः। शरीरवर्णाश्रमजातिभेदान् गुणक्रियाहेतुफलानि नित्यम्। असङ्गचिद्रूपममुं विमोह्य देहेन्द्रियप्राणगुणैर्निबध्य। अहंममेति भ्रमयत्यजस्रं मनः स्वकृत्येषु फलोपभुक्तिषु। अध्यासदोषात् पुरुषस्य संसृतिरध्यासबन्धस्त्वमुनैव कल्पितः। रजस्तमोदोषवतोऽविवेकिनो जन्मादिदुःखस्य निदानमेतत्। अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः। येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम्। तन्मनः शोधनं कार्य्यं प्रयत्नेन मुमुक्षुणा। विशुद्धे सति चैतस्मिन् मुक्तिः करफलायते। मोक्षैकसक्त्या विषयेषु रागं निर्म्मूल्य संन्यस्य च सर्वकर्म्म। सच्छ्रद्धया यः श्रवणादिनिष्ठो रजःस्वभावं स धुनोति बुद्धेः। मनोमयो नापि भवेत् परात्मा ह्याद्यन्तवत्त्वात् परिणामिभावात्। दुःखात्मकत्वाद्विषयत्वहेतोर्द्रष्टा हि दृश्यात्मतया न दृष्टः। बुद्धिर्बुद्धीन्द्रियैः सार्द्धं सवृत्तिः कर्त्तृलक्षणः। विज्ञानमयकोषः स्यात् पुंसः संसारकारणम्। अनुव्रजेच्चित्प्रतिविम्बशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः। ज्ञानक्रियावानहमित्यजस्रं देहेन्द्रियादिष्वभिमन्यते भृशम्। अनादिकालोऽयमहंस्वभावो जीवः समस्तव्यवहारवोढ़ा। करोति कर्म्माण्यथ पूर्ववासनः पुण्यान्यपुण्यानि च तत्फलानि। भुङ्क्ते विचित्रास्वपि योनिषु व्रजन्नायाति निर्यात्यध ऊर्द्ध्वमेषः। अस्यैव विज्ञानमयस्य जाग्रत्स्वप्नाद्यवस्थासुखदुःखभोगाः। देहादिनिष्ठाश्रमधर्म्मकर्म्मगुणाभिमानः सततं ममेति। विज्ञानकोषोऽयमतिप्रकाशः प्रकृष्टसान्निध्यवशात् परात्मनः। अतोभवत्येव उपाधिरस्य यदात्मधीः संसरति भ्रमान्न। योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्ययं ज्योतिः। कूटस्थः सन्नात्मा कर्त्ता भोक्ता भवत्युपाधिस्थः। स्वयं परिच्छेदमुपेत्य बुद्धेस्तादात्म्यदोषेण परं मृषात्मनः। सर्व्वात्मकः सन्नपि वीक्षते स्वयं स्वतः पृथक्त्वेन मृदोघटानिव। उपाधिसम्बन्धवशात् परात्मा ह्युपाधिधर्म्माननुयाति तद्गुणः। अयोविकारानविकारिवह्निवत् सदैकरूपोऽपि परः स्वभावात्। शिष्य उवाच। भ्रमेणाप्यन्यथा वाऽस्तु जीवभावः परात्मनः। तदुपाधेरनादित्वान्नानादेर्नाश इष्यते। अतोऽस्य जीवभावेऽपि नित्या भवति संसृतिः। न निवर्त्तेत, तन्मोक्षः कथं? मे श्रीगुरो! वद।